International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2022; 8(6): 203-205
© 2022 IJSR
www.anantaajournal.com
Received: 08-08-2022
Accepted: 19-10-2022

**सूर्यवंश झाः**
गवेषक, स्नातकोत्तर व्याकरण विभाग, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**सूर्यवंश झाः**
गवेषक, स्नातकोत्तर व्याकरण विभाग, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# अमरकोषकारस्य परिचयः

**सूर्यवंश झाः**

## प्रस्तावना

अमरकोषस्य पूर्वजाः– व्याडिभागुरिधन्वन्तरिवररुचिप्रभृतय आसन्। कोषटीकाकार-स्सर्वानन्दोऽमरसिंहं तेषां तन्त्रसाहाय्येन स्वकृतिं घटितां विलोकयति। पुरुषोत्तदेवमहेश्वरहेमचन्द्राः अमरकोषे कात्यायनवाचस्पत्ययोः स्वोपज्ञटीकायां रचनोपयोगमन्विष्यन्ति। हेमचन्द्रोऽभिधानचिन्तामणेः व्याडिकृतकोषात् यदुद्धरति तस्मात्तस्य विपुलकायत्वं संसूच्यते। किरणप्रकरणे व्याडिना विज्ञापितं यद् रविमयूखाः विभिन्नर्तुषु कथं हीयन्ते वर्धन्ते च। कति चन्द्रमसो रथाः कथमप्सरसां समुद्भवः। बौद्धधर्मस्य कतिपयतत्त्वान्यपि तत्र शक्यते यदमरसिंहेन व्याडि-कृत प्रकाशितान्यासन्। एतेनानुमातुं कोषविधिरप्यनुसृतः स्यात्।

भागुरिकोषकारस्य त्रिकाण्डकोषोऽमरकोषात् सर्वथाभिन्नएवाभूत्। मालाकारः क्षीरस्वामिहेमचन्द्राभ्यां बहुवारं स्मृतः परं मालालेखकोऽमरदत्तोऽमरकोषकारात् अमरसिंहात् सर्वथाभिन्नो हलायुधेन प्रामाणिक इति मत्त्वा स्मृतः। वाचस्पतेः कृतिरेकार्थकशब्दानां सुभण्डारः हेमचन्द्रेणाभिधानचिन्तामणेष्टीकाया सुविचारितकतिपयशब्दाक्षरविन्यासः, आमुखे प्रमाणत्वेन धन्वन्तरिरमरसिंहस्य चिन्तितश्शब्दार्णवकोषस्तदा लब्धसत्ताकोऽवर्त्तत। पूर्ववर्त्तिकोषकारो वनस्पतिवर्गेण सम्बन्धं निघण्टुं रचयामास। सर्वकोषकृतां प्रादुर्भावः कुत्र कदा ज्ञायते। चाभवत्नेदं स्वरूपतोऽमरकोषो व्याडिवररूचिभागुरिधन्वन्तरीणां संक्षेपोऽस्तीति एच०पी० शास्त्री मनुते। क्षीरस्वामिकृट्टीकायाः संस्कर्त्ता के ओका कात्यायनं मालाकारं च एवं केशवो निजकल्पद्रुकोषे वाचस्पतिमपिअमरसिंहस्य पूर्ववर्त्तिनं मन्यते। कोलब्रुकमहोदयो रभसमरमरकोशस्य स्रोतः स्वीकरोति परं रामावतारशर्मा रभसमेवामरसिंहस्यानुयायिनम-भ्युपगच्छति।

अमरकोषस्य पूरककोषा अपि विद्वत्समाजे स्वीक्रियन्ते। बौद्धधर्मानुयायिन स्त्रिकाण्डशेषोऽमरकोषस्य पूरक आसीदिति कथ्यते। पुरुषोत्तमदेवस्तस्य संग्रहीता आसीत्। अमरकोषे बुद्धानां सप्तदशनामानि विन्यस्तानि सन्ति, त्रिकाण्डशेषे तानि सप्तत्रिंशानि कृतानि। अमरकोषे गौतमबुद्धस्य सप्तनामसु त्रीण्यन्यानि तेन वर्धितानि। अग्निपुराणां कोषसङ्कलनेऽमरकोशस्य परिवर्त्तितं रूपं प्रस्तौति वर्गविभाजने किंचिदन्तरेण सह।

अमरकोषस्य प्रत्येककाण्डस्यान्ते एकः श्लोकः मिलति येन प्रतीतिर्भवति यदस्यकोषस्यरचयिता अमरसिंहः वर्तते।[1] कोषकारस्तु स्व विषये परिचयं न दत्तवान्।

कोषकारस्य अनेन नाम्ना क्षत्रियः स्वीक्रियते एतत्प्रसंगे श्लोकानुसारेण अमरसिंहः शबरस्वामी पुत्र आसीत् तथा च तस्य पत्नी शूद्रादुत्पन्नः। एवं श्लोकः–

ब्राह्मण्यायभवद वराह मिहिरो ज्योतिर्विदामग्रणी
राजा भर्तृहरिश्च विक्रमनृपः क्षत्रात्मजायामभूत्।
वैश्यायां हरिश्चन्द्र-वैद्यतिलको जातश्च शंकुःकृती
शूद्रायामरः षडेव शवरस्वामि द्विजस्यात्मजाः॥[2]

श्लोऽस्मिन् परिगणिते शवरस्वामिनः पुत्रः यदि ऐतिहासिकः, तदा तस्य समसामयिके एव संदेहः, अपितु एक पितुः तु दूरं भवति।
अमरकोषस्य मङ्गलाचरणस्यश्लोकः तथा चान्यदेवात् पूर्वं बुद्धस्यैव पर्याय प्रतिपादने विदुषां मध्ये धारणाऽऽसीत् यदयमरसिंहः बौद्ध आसीत्।[3]
परन्तु एभिः प्रमाणैः तस्य यदि बौद्धः मन्यते तदा अमरकोषे बौद्धसंघस्य पारिभाषिकशब्दानामभावो दृश्यते, तथा च तदभिन्नं कोषकारः वर्णाश्रमव्यवस्था तथा च यज्ञसंस्थायाः स्वकोषे महत्त्वपूर्णं स्थानं दत्तवान्। एतेनानुमीयते यदमरसिंह समये हिन्दू समाजः उदारतावशात् बौद्धं आत्मसात्कृतवान् तथा चान्ते दशावतारे प्रतिष्ठितोऽभवत्। एवमन्यदेवात्पूर्वं बौद्धस्य स्थाने सति तस्य पक्षपातं बुद्धप्रति तस्यानुरागं द्योतितं भवति, अथवा अमरसिंहेणतक्षशिलासदृशं बौद्ध विद्यापीठे शिक्षां गृहीतः तथा च श्रौतस्मार्त भूत्वापि विद्यार्थीजीवनस्याभ्यासवशात् ग्रन्थारंभे भगवान् बुद्धस्यस्यस्मरणं कृतः तथा चान्य देवात् पूर्वमेव तस्य परिगणितः।
'अमरकोषः' अस्यप्रमाणीकरोति यदमरसिंहः बहुश्रुतः। व्याकरण तथा च स्व पूर्ववर्तीकोषसाहित्यात् तस्य सामीप्य सम्बन्ध आसीत् तथा चायुर्वेदादि शास्त्राणां प्रौढज्ञानं भवेदिति। राजशेखरः काव्यमीमासांयामुल्लेखितवान् यदुज्जयिन्यां कवि परीक्षायां अमरसिंहः भागः गृहीतवान्। प्राचीनकिंवदन्त्यनुसारेण अमरकोषस्य रचयिता अमरसिंहं विक्रमादित्यस्य नवरत्नेषु परिगणितवान्। किंबदन्ति निम्नलिखितश्लोके निबद्धः–

धन्वन्तरिक्षपणकामरसिंह
शंकुवेतालभट्टघटखर्परकालिदासाः।
ख्यातो वाराहमिहिरो नृपतेः समायां रत्नानि वै
वररुचिर्नवं विक्रमस्य॥[3]

अपि च-

इन्द्रश्चान्द्रः काशकृत्स्नापिशली शाकटायनः।
पाणिन्यमर जैनेन्द्रा भवन्त्यष्टौ शाब्दिकाः॥ [4]

अस्य श्लोकानुसारेण 'पाणिनि' एवं 'जैन' अर्थात् समन्तभद्रस्य मध्यकाले एवाऽभवत्, किन्तु पाणिनी अष्टाध्यायी भाष्यकर्त्ता भगवान् पतञ्जलेः समकालीनः 'चान्द्रव्याकरण' कर्ता आचार्य चन्द्र उक्त श्लोके पूर्वमेव पाणिनिः प्रयोगे क्रमोऽयं समीचीनं न दृश्यते, अन्ये त्वस्य षष्ठ शताब्दी स्वीकरोति। यद भवतु स्वर्गवगे देवानां पर्यायानन्तरं भगवान् बुद्धस्य पर्यायवाचि शब्दानां तेन प्रतिपादितः।
अतः प्रतीतिर्भवति यदयमरसिंहः बौद्धमताबलम्बिन आसीत्, प्रायः सर्वैर्विद्वद्भि स्वीक्रियते। अमरसिंहेण अन्य ग्रन्थस्य रचना कृतम् न वा इति तु विवादास्पदं वर्तते। मथुरानाथ शास्त्री 'अमरकोषे टीकाकाराणां कृपा' शीर्षक लेखे अमरभारत्यां लिखितवान् यत्-अस्य विषये दन्तकथा वर्तते यत् एभिः महानुभावैः विविधग्रन्थान् रचयित्वा नावं स्थाप्य कुत्रचिदन्यत्र गमनं करोति स्म। तत्र बौद्धधर्म विरोधिन आर्यान् अमरकोषं विहाय सर्वान् ग्रन्थान् जले अददन्, किन्तु तद् विषये प्रमाणाभावो दृश्यते। लिङ्गानुशासनस्य श्लोकान् प्रायः पाणिनि सूत्राधारे तेन लिखितः।
अमरसिंह विषये श्रुतमस्ति–

अमरिसिंहस्तु पापीयान् सर्वं भाष्यमचूचुरत्।

अनेनाधारेण व्याकरणशास्त्रेऽस्य पाण्डित्यपाखार्यत्वेऽपि उक्तश्लोकेन तस्योपरि भाष्य चौर्यस्यदोषारोपं इर्ष्या युक्तं कथितुम् शक्यते, यतः ग्रन्थारम्भे एव

समाहृत्यान्यतन्त्राणि संक्षिप्तैः।
सम्पूर्णमुच्यते वर्गैर्नामलिङ्गानुशासनम्॥ [5]

एभिवचनैर्दोषमुक्तो भवति, उक्त दोषाभावेऽपरः पक्षः वर्तते यत् भाष्यकारः घञन्त - आवन्त शब्दयोः पुल्लिङ्गः लिखति तदा तु गतानुगतिक अथवा चौर्यदोषभयात् परवर्ती ग्रन्थकारः स्त्रीत्वं लिखितुम् न शक्यते, अतः यदि पुल्लिङ्गं लिखति तदा तु तस्योपरि भाष्यचौर्य दोषारोपं तु न भवति अपितु भाष्यमत प्रचाररस्य श्रेयः प्राप्तिर्भवति, इत्येवोचितः। अमरसिंह विरचित अमरकोषस्य यदि अमरभाषा (संस्कृत) साहित्यस्य अमरकोष (अक्षयनिधि

इत्यपि) कथनेन अतिश्योक्ति भवति, यतो हि येन अमरकोषेण पण्डितप्रवरस्यभिधानं चिरायामरत्वमगच्छत्, तस्यामरकोषस्यादरं न केवलं भारतवषेऽपितु सम्पूर्ण भूमण्डले परिदृश्यते। विद्याप्रेमी यूरोपवासी स्वभाषायां अस्यानुवादं कृत्वा तल्लाभं प्राप्त विषये न किमपि आश्चर्यं भवितुम् शक्यते, एवं धर्मान्धितावशात् अन्यसम्प्रदायानां ग्रन्थान् अग्निं तथा च जलदेवस्य शरणं ददन्नपि मुहम्मदजातिनामपि अस्य स्वभाषायामनुदृत्य मुक्त हृदयेनास्य उपायोगिताऽङगी करोति। अस्माकं भारतवासीनां हर्षस्य विषयोऽयं यदस्य ग्रन्थस्य सुदूरतम चीनदेशेऽपि अस्यानुवादं गौरवपदं वर्तते।

अमरसिंहस्तु स्वकोषग्रन्थे नाम्ना सहेव लिङ्गानुशासनमपि संयोज्य तथा च तस्य निर्वहणमपि कोषकारस्य वैशिष्ट्यमेवास्ति यतः नामपदपरिगणन सहेव रूप भेदानुसारं लिङ्गभेदमपि तेन निर्मितः। लिङ्गनिर्देशस्य नियमः कोषकारस्तु कोषस्य प्रारम्भे कृतवानिति। एवं कोषे अर्थ द्योतन सहेव लिङ्गज्ञानमपि प्रचलति। अमरसिंहस्तु स्वकोषे कोऽपि नामपदस्याव्ययत्वे तथा च एकवचन, द्विवजन, बहुवचने प्रयुक्तस्यापि निर्देशः कृतवान्, लिङ्गसम्बन्धेऽपि कोऽपि पदस्य स्पष्टज्ञानं तेन कृतमिति। एवं मुख्यरूपेण पर्यायवाचीकोष भूत्वाऽपि अमरकोषस्य तृतीयकाण्डे नानार्थ वर्ग माध्यमेनानेकार्थी कोष शैली निमित्तमाधार प्रस्तुतमिति। लिङ्गादिसंग्रहवर्ग माध्यमेन शब्दानां लिङ्गप्रदर्शितानां कोषाणामपि मार्गदर्शनं तेन कृतः। नानार्थवर्गस्याधारेणैव अमरसिंहस्तु वर्णदिक्रमशैल्या अपि मार्गदर्शनं कृतवानिति। पद्यवद्धरचनानुसारेणैव पर्यायवाची शब्दानां क्रमविशेषस्य सम्यक् परिपालनं तेन न कृतमपितु छन्दनिर्वाह दृष्ट्या एव प्रतिपादितः।

एवं हि अमरकोषकारस्य कृतिः संस्कृतजगतस्य सर्वोत्कृष्ट ग्रन्थरूपेण पल्लवितं तथा पुष्पितं दृश्यते अनेन ग्रन्थेन संस्कृतज्ञानां समग्रतया ज्ञानंभवितुम् शक्यते, अतः कोषकारः संस्कृत जगत्कल्याणाय महान्तमुपकारं कृतवानिति।

## संदर्भः


1. अमरसिंह कृतौ नामलिङ्गानुशासने।
2. इण्डियन कैटलाग, वाल्यूम-6 पृ० 209।
3. अमरकोष भूमिका।
4. संस्कृतवांमयस्य इतिहासः।
5. संस्कृतवांमयस्य इतिहासः।